| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
|---|---|---|
| प्रभद्रकम् | भवति नजौ भजौ रसहितौ प्रभद्रकम्<br>।।।,।ऽ।.ऽ।।,।ऽ।,ऽ।ऽ | |
| एला<br>पञ्चभिर्दशभिश्च यतिः । | सजना नयौ शरदशयतिरियमेला<br>।।ऽ,।ऽ।,।।।,।।।,।ऽऽ | |
| कामक्रीड़ा | माः पञ्च स्युर्यस्यां सा कामक्रीड़ासंज्ञा ज्ञेया<br>ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ | |
| सुखेलकम् | नजभजरैर्विराजितमिदं सुखेलकम्<br>।।।, ।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ | |
| चन्द्रकान्ता<br>सप्तभिरष्टाभिश्च यतिः । | चन्द्रकान्ताभिधा रौ म्सौ यो विरमः स्वराष्टौ<br>ऽ।ऽ,ऽ।ऽ,ऽऽऽ,।।ऽ,।ऽऽ | |
| उपमालिनी<br>अष्टाभिः सप्तभिश्च यतिः । | ननतभरकृताष्टस्वरैरुपमालिनी<br>।।।,।।।,ऽऽ।,ऽ।।,ऽ।ऽ | |
| ऋषभः | ऋषभाख्यमेतदुदितं सजसा सयौ चेत्<br>।।ऽ,।ऽ। ।।ऽ,।।ऽ,।ऽऽ | |
| मानसहंसः | कथयन्ति मानसहंसनाम सजौ जभराः<br>।।ऽ,।ऽ।,।ऽ। ऽ।।,ऽ।ऽ | |
| नलिनी | सगणैः शिववक्त्रमितैर्गदिता नलिनी<br>।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ, | |
| निशिपालकम् | शंस निशिपालकमिदं भजसनाश्च रः<br>ऽ।।,।ऽ।,।।ऽ,।।।,ऽ।ऽ | |
| षोड़शाक्षरा वृत्तिः । अष्टिः । | | |
| चित्रम् | चित्रसंज्ञमीरितं समानिका पदद्वयन्तु<br>ऽ,।,ऽ।ऽ,।ऽ।,ऽ,।,ऽ।ऽ,।ऽ। | विद्रुमाभ्रबाधरोष्ठशोभिवेणुवाद्यहृष्ट-<br>वल्लवीजनाङ्गसङ्गजातपुष्पकण्टकाङ्ग ! ।<br>त्वां सदैव वासुदेव ! पुण्यलभ्यपादसेव !<br>वन्यपुष्पचित्रकेश ! संस्मरामि गोपवेश ! ॥ |
| ऋषभगजविलसितम्<br>गजतुरगविलसितमिति ग्रन्थौ ।<br>सप्तभिर्नवभिश्च यतिः । | भ्रनिनगैः स्वराङ्कमृषभगजविलसितम्<br>ऽ।।,ऽ।ऽ,।।।,।।।,।।।,ऽ | यो हरिरुच्चस्वानखरतरनखरशरै-<br>र्दुर्जयदैत्यसिंहसुविकटहृदयतटम् ।<br>किञ्चिदह चित्रमेष यदखिलमपहृतवान्<br>कंसनिदेशदृप्यदृषभगजविलसितम् ॥ |
| चकिता<br>अस्या अष्टमे यतिः । | भात् समतनगैरष्टच्छेदे स्यादिह चकिता<br>ऽ।।,।।ऽ,ऽऽऽ,ऽऽ।,।।।,ऽ | दुर्जयदनुजश्रेणीदुश्चेष्टाश्रुतचकिता<br>यद्भुजपरिघत्राता याता साध्वसविगमम् ।<br>दीव्यति दिवि यन्माला स्वेच्छं नन्दनविपिने<br>गच्छत शरणं तूर्णं तं भीता भवरिपुतः ॥ |
| पञ्चचामरम् | प्रमाणिका पदद्वयं वदन्ति पञ्चचामरम्<br>।ऽ।,ऽ।ऽ,।,ऽ,।ऽ।,ऽ।ऽ,।,ऽ | सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते<br>लसद्वितानभूषिते सलीलविभ्रमालसम् ।<br>सुराङ्गनाभवल्लवीकरप्रपञ्चचामर-<br>स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥ |
| मदनललिता<br>चतुर्थे षष्ठे च यतिः । | म्भौ नो म्नौ गो मदनललिता वेदैः षडृतुभिः<br>ऽऽऽ,ऽ।।,।।।,ऽऽऽ,।।।,ऽ | विभ्रश्यन्मालितचिकुरा धौताधरपुटा<br>म्लायत्पत्रावलिकुचतटोच्छासोर्म्मितरला ।<br>राधात्यर्थं मदनललितान्दोलालसवपुः<br>कंसारातेरतिरसमहो चक्रेऽतिचटुलम् ॥ |
| वाणिनी | नजभजरैर्यदा भवति वाणिनी गयुक्तैः<br>।।।,।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ,ऽ | स्फुरतु ममाननेऽद्य ननु वाणि ! नीतिरम्यं<br>तव चरणप्रसादपरिपाकतः कवित्वम् ।<br>भवजलराशिपारकरणक्षमं मुकुन्दं<br>सततमहं स्तवैः स्वरचितैः स्तवानि नित्यम् ॥ |
| प्रवरललितम् | यमौ नः सौ गश्च प्रवरललितं नाम वृत्तम्<br>।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।ऽ,ऽ | भुजोत्क्षेपः शून्ये चलवलयझङ्कारयुक्तो<br>मुधा पादन्यासः प्रकटिततुलाकोटिनादः ।<br>स्मितं वक्त्रेऽकस्माद्दृशि पटुकटाक्षोर्म्मिलीला<br>हरौ जीयादीदृक् प्रवरललितं वल्लवीनाम् ॥ |